# श्री किङ्गृहेश स्तुथि

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥

अयत्न संकल्पित सर्वलोक सर्गापवर्गस्थिति संविधानम् ।
अनादिमध्यान्तमशेषनाथं किंगेहनाथं शरणं भजामि ॥१

अकृत्रिमानां वचसामभूमिं अगोचरं ब्रह्मशिवादिवाचाम् ।
अहं स्तुवे किङ्गृहनायक त्वां तथाप्यलज्जंस्तु मितं पचोक्तिः ॥२

अकिञ्चनोऽनन्यगतिस्त्वदीय स्तुतिं करोमीति मतिं करोमि ।
कृपानिधे किंगृहनायकाद्य त्वमेव मे वाचमुदीरयेथाः ॥३

त्वयैव दत्तामुपलभ्य वाणीं अणीयसीमप्यतुलप्रभावम् ।
प्रसादये किङ्गृहनायक त्वां नचेत् कुतो मे सफलं वचस्स्यात् ॥४

अनेन जीवेन समस्तवस्तु प्रविश्य नामानि च रूपभेदैः ।
व्याकृत्य वीक्षावनमध्य भागे विभुं शयानं सततं भजामि ॥५

अशेष पुंसां हृदि सन्निविष्टं अनल्पशक्त्यादि गुणैर्विशिष्टम् ।
हृत्ताप हृत्पङ्कज भृङ्गजुष्टं देवं भजे किंगृहगं ममेष्टम् ॥ ६

श्री शालिहोत्रार्पित शालिपिष्ट हृष्टो भवान् देव शयिष्णुरेनम् ।
किं गेहमत्रेति यदावदत् तत् किंगेहमासीत् तव सद्म नाम्ना ॥७

पद्मा महीलालित पाद पद्मम् पद्मासनाधिष्ठित निम्ननाभिम् ।
शयानमाक्रम्य भुजङ्गतल्पं किंगेहसद्मानमहं सतोऽस्मि ॥८

विस्मेरमासीत् भुवनं त्वदीय चरित्र मन्वीक्ष्य चिरप्रवृत्तम् ।
किंगेह नाथासुरकैटभादि निबर्हणाथं किल सर्वशक्ते ॥९

गङ्गादि तीर्थानि निषेव्य शंभुः सर्वाणि पुण्यायतनानि गत्वा ।
अमुक्त पूर्वो विधिहत्ययात्वां किंसेव्य किंगेहपदे विमुक्तः ॥१०

अजन्हुजानोद्य महापराधं द्विजं हि हृत्तापहरं सरस्ते ।
अतीतरत् कौशिकमद्भुतं त्वत् प्रभवतः किंगृह नाथ नैतत् ॥ ११

रघुप्रवीरस्य तवार्हमेतत् यथागतस्यैव सिपोर्जिघांसोः ।
विधूय रक्षस्त्वं अमुष्य दिव्यं अदाः पदं किंगृह नायक त्वम् ॥ १२

पिष्टप्रदीपान् परिकल्प्य ये त्वां हृष्टा भजन्तेऽहनि पुष्यदर्शे ।
इष्टप्रदायी वितनोषि तेषां कष्टोपभोग्यान्यपि काङ्क्षितानि ॥ १३

## श्री किङ्गृहेश स्तुथि

विकासयन् मानसपङ्कजानि विपश्चितां निश्चल भक्ति भाजाम्।

प्रादुर्भवन्नासुरकैटभादि तमोरवे त्वं मयि सुप्रसीद॥ १४

प्रद्युम्न नाम्ने तपसां हि धाम्ने कृपाप्रसन्ने त्वयि किंगृहेश।

गङ्गा धिकत्वं न किमाप तीर्थं हृत्तापहं वा तनयं न वन्ध्या॥ १५

त्वम् सर्ववित् त्वम् कमला सहायः त्वमेव वेदान्त वचोऽवसेयः।

भवन्तमेतं शरणं प्रपन्नाः वयं न यस्मात् परमस्ति दैवम्॥ १६

पुराणपुंभावमहो विगूह्य युवत्वमेवाकलयन् सुरूपम्।

उपायमस्त्वं किल धर्मसेनसुतां नताङ्गीमिह किंगृहेश॥ १७

श्री भूमिलालितपदं श्रितशेक्षतल्पं कल्पान्तयोग्य भुवनावन योगनिद्रम्।

श्री शालिहोत्र शिरसा धृतहस्त पद्मम् श्री वीरराघव विभुं श्रयतां मनो मे॥ १८

वेङ्कटेश कविना विनिर्मितां किंगृहाधिपति कंस्तुतिं पठन्।

दिव्यभोगमुपभुज्य मानवो भव्यरूपमवमोकयेत् प्रभोः॥ १९

कवितार्किक सिंहाय कल्याण गुण शालिने।

श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः॥